৮। বিরুদ্ধয়ো র্ভৃশমিহ মন্ত্রিমুখ্যয়ো র্মহাবনে বনগজয়োরিবান্তরে ।

অনিশ্চয়াদ্গজবশয়েব ভীতয়া গজগতৈর্ধ্রুবমিহ খিদ্যতে শ্রিয়া।।(২।৩)

কালিদাসোত্তরকালীনেন নাট্যকারেণ বিশাখদত্তেন রচিতস্য মুদ্রারাক্ষসনাটকস্য দ্বিতীয়াঙ্কাৎ সমুৎকলিতোঽয়ং শ্লোকঃ। আহিতুণ্ডিকবেশেন রাক্ষসস্য গুপ্তচরঃ চন্দ্রগুপ্তস্য রাজ্যবার্তাং জ্ঞাত্বা রাক্ষসসকাশমাগতবান্। স্বগতোক্তিপ্রসঙ্গে সঃ অত্র বদতি যৎ রাক্ষসচাণক্যয়োর্মধ্যে কঃ শ্রেষ্ঠঃ ইতি জ্ঞাতুম্ অশক্তা রাজলক্ষ্মীঃ আশ্রয়স্থাননির্ধারণবিষয়ে দোলাচলবৃত্তিসম্পন্না প্রতিভাতি।

মহাবনে ভৃশং বিরুদ্ধয়োঃ বনগজয়োঃ অন্তরে ইব ভৃশং বিরুদ্ধয়োঃ মন্ত্রিমুখ্যয়োঃ ইহ অনিশ্চয়াত্ ীতয়া গজবশয়া ইব শ্রিয়া ইহ গজগতৈঃ ধ্রুবং খিদ্যতে ইত্যন্বয়ঃ।

মহাবনে গভীরে অরণ্যে ভৃশম্ অতিমাত্রম্ বিরুদ্ধয়োঃ হস্তিযুগলস্য পরস্পরং বিরোধং কুর্বতোঃ অন্তরে মধ্য ইব ভৃশং বিরুদ্ধয়োঃ মন্ত্রিমুখ্যয়োঃ চাণক্যরাক্ষসয়োঃ ইহ শ্রিয়া রাজলক্ষ্ম্যা ইদানীং গতাগতৈঃ বারং বারং গমনাগমনৈঃ ধ্রুবং নিশ্চিতমেব খিদ্যতে ক্লিশ্যতে পরিশ্রমাতিশয়াত্ ইতি ভাবঃ।

একস্মিন্নেব বনপ্রদেশে একস্যৈব মহাগজস্য স্থানং ভবতি অপরস্য তস্মাৎ মৃত্যুঃ নির্বাসনো বা জায়তে। তথৈব রাজ্যে চাণক্যরাক্ষসয়োর্মধ্যে বিবাদে

৯। পৃথিব্যাং কিং দগ্ধাঃ 'প্রথিতকুলজা ভূমিপতয়ঃ
পতিং পাপে মৌর্যং যদসি কুলহীনং বৃতবতী।
প্রকৃত্যা বা কাশপ্রভবকুসুমপ্রান্তচপলা
পুরন্ধ্রীণাং প্রক্ষা পুরুষগুণবিজ্ঞানবিমুখী।। (২।৭)

বিশাখদত্তরচিতস্য মুদ্রারাক্ষসনাটকস্য দ্বিতীয়াঙ্কাৎ সমুদ্ধৃতোঽয়ং শ্লোকঃ। রাক্ষসঃ অগুণজ্ঞায়াঃ রাজলক্ষ্ম্যাঃ চাঞ্চল্যম্ বর্ণয়তি পৃথিব্যাম্ কিম্ ইত্যাদিশ্লোকেন।

পাপে! পৃথিব্যাং প্রথিতকুলজাঃ ভূমিপতয়ঃ কিং দগ্ধাঃ? যত্ ত্বং কুলহীনং মৌর্য্যং পতিং বৃতবতী অসি। বা কাশ-প্রভব-কুসুম প্রান্তচপলা পুরন্ধ্রীণাং প্রজ্ঞা প্রকৃত্যা পুরুষ-গুণ-বিজ্ঞান-বিমুখী ভবতি ইত্যন্বয়ঃ।

হে পাপে পাপচারিণি লক্ষ্মি! অন্যথা কথং সত্কুলং বিহায় অসত্কুলং বৃতবতীতি ভাবঃ। পৃথিব্যাং প্রথিতকুলজা উচ্চতয়া প্রসিদ্ধবংশোত্পন্নাঃ ভূমিপতয়ো রাজানঃ কিং দগ্ধা বিধিনা ভস্মীকৃতাঃ? যৎ যেন কারণেন ত্বং কুলহীনং বংশমর্যাদাহীনং দাসপুত্রত্বাৎ মৌর্যং মুরাপুত্রং চন্দ্রগুপ্তং পতিং পতিরূপেণ বৃতবতী অবৃণোঃ। অথবা কাশাত্ তদাখ্যবৃক্ষাৎ প্রভবতীতি তত্তাদৃশং যত্ কুসুমং পুষ্পম্ তস্য প্রান্তবত্ অগ্রদেশবত্ চপলা চঞ্চলা পুরন্ধ্রীণাং স্ত্রীণাং প্রজ্ঞা বুদ্ধিঃ প্রকৃত্যা স্বভাবেনৈব পুরুষাণাং গুণবিজ্ঞানে গুণতারতম্যবিবেচনে বিমুখী পরাঙ্মুখী ভবতি। তেন তবাপি প্রজ্ঞা তথৈব জাতেতি ভাবঃ।

অনভিজাতা রাজলক্ষ্মীঃ উচ্চবংশোত্পন্নং নন্দং বিহায় কুলহীনং দাসীপুত্রং চন্দ্রগুপ্তং বৃতবতী অতঃ সা নিতরাং পাপিষ্ঠা। পাপিষ্ঠা নারী অর্থং দৃষ্ট্বা বরং বরয়তি ন তু কুলাদিকং বিচার্য্য নায়কনির্বাচনং করোতি। কাশকুসুমানাং

রীতিঃ। ...

১০। কর্ণেনেব বিষাঙ্গনৈকপুরুষব্যাপাদিনী রক্ষিতা
হন্তুং শক্তিরিবার্জুনং বলবতী যা চন্দ্রগুপ্তং ময়া।
সা বিষ্ণোরিব বিষ্ণুগুপ্তহতকস্যাত্যন্তিকশ্রেয়সে
হৈড়িম্বেয়মিবেত্য পর্বতনৃপং তদ্বধ্যমেবাবধীৎ ।।(২।১৫)

বিশাখদত্তবিরচিতস্য মুদ্রারাক্ষসনাটকস্য দ্বিতীয়েঽঙ্কে শ্লোকোঽয়ং সহৃদয়ানাং নয়নানন্দং জনয়তি। অমাত্যরাক্ষসঃ স্বয়মেব স্বপ্রযুক্তায়াঃ নীতেঃ বৈফল্যং বর্ণয়তি কর্ণেত্যাদিভিঃ।

কর্ণেন ইব ময়া অর্জুনম্ ইব চন্দ্রগুপ্তম্ হন্তুং বলবতী একপুরুষব্যাপাদিনী শক্তিঃ ইব সা বিষকন্যা রক্ষিতা, সা বিষ্ণোঃ ইব বিষ্ণুগুপ্তহতকস্য আত্যন্তিকশ্রেয়সে তদ্বধ্যম্ এব বৈড়িম্বেয়ম্ ইব পর্বতনৃপম্ এত্য অবধীত্ ইত্যন্বয়ঃ।

কর্ণেন অঙ্গরাজেন ইব ময়া রাক্ষসেন অর্জুনমিব তৃতীয়পাণ্ডবমিব চন্দ্রগুপ্তং মৌর্যরাজং হন্তুম্ বলবতী দীব্রা অনিবার্য্যা চ একং পুরুষং ব্যাপাদয়িতুং হন্তুং শীলং যস্যাঃ সা তাদৃশী শক্তিরস্ত্রবিশেষঃ ইব সা বিষাঙ্গনা বিষদায়িনী কন্যা রক্ষিতা এতাবন্তং কালং যাবত্ সাবধানং পালিতা। সা বিষকন্যারূপিণী শক্তিঃ। বিষ্ণোঃ শ্রীকৃষ্ণস্যেব বিষ্ণুগুপ্তহতকস্য নিকৃষ্টচাণক্যস্য আত্যন্তিকশ্রেয়সে কোন্তমঙ্গলায়, তস্য বিষ্ণোশ্চাণক্যস্য চ বধ্যং বিনাশ্যং, একত্র পাপিত্বাৎ অন্যত্র চ রাজ্যার্দ্ধভাগিতয়া চন্দ্রগুপ্তপ্রতিপক্ষত্বাৎ ইতি ভাবঃ হৈড়িম্বেয়মিব হিড়িম্বাতনয়ং ঘটোৎকচমিব পর্বতমিব পর্বতনৃপং রাজানং পর্বতেশ্বরম্ এত্য প্রাপ্য অবধীৎ নিহতবতী ইতি সরলার্থঃ।

তৃতীয়পাণ্ডবম্ অর্জুনং হন্তুং কর্ণেন ইন্দ্রপ্রদত্তা একপুরুষঘাতিনী শক্তিঃ যথা রক্ষিতা আসীৎ তথৈব রাক্ষসেন চন্দ্রগুপ্তবিনাশার্থং একপুরুষঘাতিনী বিষকন্যা বহুকালং যাবত্ পালিতা আসীৎ। যথা বিষ্ণোঃ প্রয়োজনসিদ্ধয়ে তথৈব বধ্যং হিড়িম্বাপুত্রং ঘটোৎকচং যা শক্তিঃ যথা বিনষ্টবতী তথৈব চাণক্যস্য

(১১) প্রারভ্যতে ন খলু বিঘ্নভয়েন নীচৈঃ
প্রারভ্য বিঘ্নবিহতা বিরমন্তি মধ্যাঃ।
বিঘ্নৈঃ পুনঃ পুনরপি প্রতিহন্যমানাঃ
প্রারব্ধমুত্তমগুণাস্ত্বমিবোদ্বহন্তি।।(২।১৭)

শ্লোকোঽয়ং বিশাখদত্তবিরচিতস্য মুদ্রারাক্ষসনাটকস্য দ্বিতীয়াঙ্কে রসিকানাম্ নয়নপথমুপৈতি। অমাত্যরাক্ষসং প্রতি বিরাধগুপ্তস্য ইয়মুক্তিঃ। অস্মিন্ শ্লোকে বিরাধগুপ্তঃ বদতি যৎ রাক্ষসপ্রযুক্তনীতিভিঃ চন্দ্রগুপ্তস্যৈব সমুন্নতিঃ পরিলক্ষ্যতে তথাপি রাক্ষসেন কথং প্রারব্ধম্ ন ত্যাজ্যমিতি।

নীচৈঃ নিকৃষ্টগুণৈঃ জনৈঃ বিঘ্নভয়েন ন প্রারভ্যতে খলু, মধ্যাঃ মধ্যমগুণাঃ জনাঃ প্রারভ্য বিঘ্নবিহতাঃ সন্তঃ বিরমন্তি, ত্বম্ ইব উত্তমগুণাঃ বিঘ্নৈঃ পুনঃ পুনরপি প্রতিহন্যমানাঃ সন্তঃ অপি প্রারব্ধম্ উদ্বহন্তি ইত্যন্বয়ঃ।

নীচৈঃ নিকৃষ্টগুণৈ জনৈঃ বিঘ্নভয়েন ন প্রারভ্যতে খলু কার্য্যং নোপক্রমতে এব। মধ্যা মধ্যমগুণাঃ জনাঃ প্রারভ্য কার্য্যমুপক্রম্য বিঘ্নেন বিহতা নাশিতোদ্যমাঃ সন্তঃ বিরমন্তি কার্য্যান্নিবর্ত্তন্তে। ত্বমিব উত্তমগুণা জনাস্তু বিঘ্নৈঃ পুনঃ পুনঃ প্রতিহন্যমানা নাশ্যমানোদ্যমাঃ সন্তোঽপি প্রারব্ধম্ উপক্রান্তং কর্ম উদ্বহন্তি সম্পাদয়ন্তি। যতঃ রাক্ষসঃ উত্তমগুণযুক্তঃ অতঃ চন্দ্রগুপ্তস্য উচ্ছেদসাধনং কর্ম ন বিঘ্নভয়াত্ ত্যাজ্যমিতি তাৎপর্য্যার্থঃ।

অত্র ত্বমিবেতি শ্রৌতোপমালঙ্কারঃ তথা প্রারভ্যত ইতি কর্মবাচ্যপ্রত্যয়েন প্রক্রম্য বিরমন্তীত্যাদিকর্তৃবাচ্যপ্রত্যয়াভিধানাত্ ভগ্নপ্রক্রমতা দোষঃ। প্রসাদো গুণঃ বৈদর্ভী চ রীতিঃ। ‘জ্ঞেয়ং বসন্ততিলকং তভজা জগৌগঃ’ ইতিলক্ষণসমন্বয়াত্